CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 809

Title Śarīraka Sūtra

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 809 Subject: Vedānta

Title: Śārīraka sūtra

Author: — Scribe: Mādhavānanda

Date of the work: — Date of the Ms.: V.S. 2560. Saraswati

Place of the work: — Place of the Ms.: Aśvanikā-mata

Size: 9·5" by 4·2" Extent: 10 fol.

Language: Sanskrit Script: Devanāgarī

Remarks: —

प्रथमाध्यायः॥ प्र॰पा॰सू॰३१॥द्वि॰पा॰सू॰३२॥तृ॰पा॰सू॰०२ च॰पा॰सू॰२८ योगः १३४
द्वितीयाध्यायः॥ प्र॰पा॰सू॰३७॥द्वि॰पा॰सू॰४४॥तृ॰पा॰सू॰५२ च॰पा॰सू॰२१ योगः १४९
तृतीयाध्यायः॥ प्र॰पा॰सू॰२७॥द्वि॰पा॰सू॰४१॥तृ॰पा॰सू॰११ च॰पा॰सू॰५२ योगः १८१
चतुर्थाध्यायः॥ प्र॰पा॰सू॰१९॥द्वि॰पा॰सू॰२१॥तृ॰पा॰सू॰१७ च॰पा॰सू॰२२ योगः ९९

अ॰१पा॰१पत्राणि८० अधिक॰११
अ॰१पा॰२पत्राणि२८ अ॰ ७
अ॰१पा॰३पत्राणि५१ अ॰१४
अ॰१पा॰४पत्राणि३३ अ॰ ८
अ॰२पा॰१पत्राणि४२ अ॰१३
अ॰२पा॰२पत्राणि५१ अ॰ ८
अ॰२पा॰३पत्राणि४३ अ॰१७
अ॰२पा॰४पत्राणि१७ अ॰ ९

शारीरकसूत्रसंख्या ५५५

माधवानंदस्येदंपुस्तकं

प्र॰ १९२ अ॰४०
द्वि॰ १५३ अ॰४७
तृ॰ १२४ अ॰५७
च॰ ४४ अ॰३९
स॰ ५१३ अ॰१९२

अ॰२पा॰१पत्राणि१८ अ॰ ६
अ॰३पा॰२पत्राणि२९ अ॰ ८
अ॰३पा॰३पत्राणि५३ अ॰३६
अ॰३पा॰४पत्राणि२४ अ॰१७
अ॰४पा॰१पत्राणि १७ अ॰१४
अ॰४पा॰२पत्राणि ९ अ॰११
अ॰४पा॰३पत्राणि ११ अ॰ ६
अ॰४पा॰४पत्राणि ७ अ॰ ७

ः॥श्रीपरमात्मनेनमः॥ ॥अथशारीरकसूत्राणि॥ ॥ॐ॥अथातोब्रह्मजिज्ञासा॥१॥जन्माद्यस्ययतः॥ ॥२॥शास्त्रयोनित्वात्॥३॥तत्तुसमन्वयात्॥४॥ईक्षतेर्नाशब्दं॥५॥गौण्यसंभवात्तु शब्दात्॥६॥तन्निष्ठस्यमोक्षोपदेशात्॥७॥हेयत्वावचनाच्च॥८॥स्वाप्ययात्॥९॥गतिसामान्यात्॥१०॥श्रुतत्वाच्च॥११॥आनंदमयोभ्यासात्॥१२॥विकारशब्दान्नेतिचेन्नप्राचुर्यात्॥१३॥तद्धेतुव्यपदेशाच्च॥१४॥मान्त्रवर्णिकमेवचगीयते॥१५॥नेतरोनुपपत्तेः॥१६॥भेदव्यपदेशाच्च॥१७॥कामाच्चनानुमानापेक्षा॥१८॥अस्मिन्नस्यचतद्योगंशास्ति॥१९॥अंतस्तद्धर्मोपदेशात्॥२०॥भेदव्यपदेशाच्चान्यः॥२१॥आकाशस्तल्लिंगात्॥२२॥अतएवप्राणः॥२३॥ज्योतिश्चरणाभिधानात्॥२४॥छंदोभिधानान्नेतिचेन्नतथाचेतोर्पणनिगदात्तथाहिदर्शनं॥२५॥भूतादिपादव्यपदेशोपपत्तेश्चैवं॥२६॥उपदेशभेदान्नेतिचेन्नोभयस्मिन्नप्यविरोधात्॥२७॥प्राणस्तथानुगमात्॥२८॥नवक्तुरात्मोपदेशादितिचेदध्यात्मसंबंधभूमाह्यस्मिन्॥२९॥शास्त्रदृष्ट्यातूपदेशोवामदेववत्॥३०॥जीवमुख्यप्राणलिंगान्नेतिचेन्नोपासात्रैविध्यादाश्रितत्वादिहतद्योगात्॥३१॥इतिप्रथमाध्यायस्यप्रथमपादः॥ ॥सर्वत्रप्रसिद्धोप ॥१॥

देशात्॥१॥विवक्षितगुणोपपत्तेश्च॥२॥अनुपपत्तेस्तुनशारीरः॥३॥कर्मकर्तृव्यपदेशाच्च॥४॥शब्दविशेषात्॥५॥स्मृतेश्च॥६॥अर्भकौकस्त्वात्तद्व्यपदेशाच्चनेतिचेन्ननिचाय्यत्वादेवंयोमवच्च॥७॥संभोगप्राप्तिरितिचेन्नवैशेष्यात्॥८॥अत्ताचराचरग्रहणात्॥९॥प्रकरणाच्च॥१०॥गुहांप्रविष्टावात्मानौहितद्दर्शनात्॥११॥विशेषणाच्च॥१२॥अंतरउपपत्तेः॥१३॥स्थानादिव्यपदेशाच्च॥१४॥सुखविशिष्टाभिधानादेवच॥१५॥अतोपनिषत्कस्यगत्यभिधानाच्च॥१६॥अनवस्थितेरसंभवाच्चनेतरः॥१७॥अंतर्याम्यधिदैवादिषुतद्धर्मव्यपदेशात्॥१८॥नचस्मार्तमतद्धर्माभिलापात्॥१९॥शारीरश्चोभयेपिहिभेदेनैनमधीयते॥२०॥अदृश्यत्वादिगुणकोधर्मोक्तेः॥२१॥विशेषणभेदव्यपदेशाभ्यांचनेतरौ॥२२॥रूपोपन्यासाच्च॥२३॥वैश्वानरःसाधारणशब्दविशेषात्॥२४॥स्मर्यमाणमनुमानंस्यादितिचेत्॥२५॥शब्दादिभ्योंतःप्रतिष्ठानान्नेतिचेन्नतथादृष्ट्युपदेशादसंभवात्पुरुषमपिचैनमधीयते॥२६॥अतएवनदेवतानरनंच॥२७॥साक्षादप्यविरोधंजैमिनिः॥२८॥अभिव्यक्तेरित्याश्मरथ्यः॥२९॥अनुस्मृतेर्बादरिः॥३०॥संपत्तेरितिजैमिनिस्तथाहिदर्शयति॥३१॥आमनंतिचैनमस्मिन्॥३२॥इति

अथमाध्यायस्यद्वितीयःपादः॥ ॥द्युभ्वाद्यायतनंस्वशब्दात्॥१॥मुक्तोपसृप्यव्यपदेशात्॥२॥नानुमानमतच्छब्दात्॥३॥प्राणभृच्च॥४॥भेदव्यपदेशात्॥५॥अकरणात्॥६॥स्थित्यदनाभ्यांच॥७॥न्यमासंज्ञसादादध्युपदेशात्॥८॥धर्मोपपत्तेश्च॥९॥अक्षरमंबरांतधृतेः॥१०॥साचप्रशासनात्॥११॥अन्यभावव्यावृत्तेश्च॥१२॥ईक्षतिकर्मव्यपदेशात्सः॥१३॥ददरउन्नरेभ्यः॥१४॥गतिशब्दाभ्यांतथाहिदृष्टंलिंगंच॥१५॥विधतेश्चमहिन्योस्यास्मिन्नुपलब्धेः॥१६॥प्रसिद्धेश्च॥१७॥इतरपरामर्शात्सइतिचेन्नासंभवात्॥१८॥उत्तराच्चेदाविर्भूतस्वरूपस्तु॥१९॥अन्यार्थश्चपरामर्षः॥२०॥अल्पश्रुतेरितिचेन्नतदुक्तं॥२१॥अनुकृतेस्तस्यच॥२२॥अपिचस्मर्यते॥२३॥शब्दादेवप्रमितः॥२४॥हृद्यपेक्षयातुमनुष्याधिकारत्वात्॥२५॥नउपर्यपिबादरायणःसंभवात्॥२६॥विरोधःकर्मणीतिचेन्नानेकप्रतिपत्तेर्दर्शनात्॥२७॥शब्दइतिचेन्नातःप्रभवात्प्रत्यक्षानुमानाभ्यां॥२८॥अतएवचनित्यत्वं॥२९॥समाननामरूपत्वाच्चावृत्तावप्यविरोधोदर्शनात्स्मृतेश्च॥३०॥मध्वादिष्वसंभवादनधिकारंजैमिनिः॥३१॥ज्योतिषिभावाच्च॥३२॥भावंतुबादरायणोस्तिहि॥३३॥सुगस्यतदनाद ॥२॥

॥२॥

रश्रवणात्तदाद्रवणात्सूच्यतेहि॥३४॥क्षत्रियत्वावगतेश्चोत्तरत्रचैत्ररथेनलिंगात्॥३५॥संस्कारपरामर्शात्तदभावाभिलापाच्च॥३६॥तदभावनिर्धारणेचप्रवृत्तेः॥३७॥श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च॥३८॥कंपनात्॥३९॥ज्योतिर्दर्शनात्॥४०॥आकाशोर्थांतरत्वादिव्यपदेशात्॥४१॥सुषुप्त्युत्क्रांत्योर्भेदेन॥४२॥पत्यादिशब्देभ्यः॥४३॥इतिप्रथमाध्यायस्यतृतीयःपादः॥ ॥आनुमानिकमप्येकेषामितिचेन्नशरीररूपकविन्यस्तगृहीतेर्दर्शयतिचा॥१॥सूक्ष्मंतुतदर्हत्वात्॥२॥तदधीनत्वादर्थवत्॥३॥ज्ञेयत्वावचनाच्च॥४॥वदतीतिचेन्नप्राज्ञोहिप्रकरणात्॥५॥त्रयाणामेवमुपन्यासःप्रश्नश्च॥६॥महद्वच्च॥७॥चमसवदविशेषात्॥८॥ज्योतिरुपक्रमात्तुतथाह्यधीयतएके॥९॥कल्पनोपदेशाच्चमध्वादिवदविरोधः॥१०॥नसंख्योपसंग्रहादपिनानाभावादतिरेकाच्च॥११॥प्राणादयोवाक्यशेषात्॥१२॥ज्योतिषैकेषामस्त्यन्ने॥१३॥कारणत्वेनचाकाशादिषुयथाव्यपदिष्टोक्तेः॥१४॥समाकर्षात्॥१५॥जगद्वाचित्वात्॥१६॥जीवमुख्यप्राणलिंगान्नेतिचेन्नोपासात्रैविध्यादाश्रितत्वादिहतद्योगात्॥१७॥न्यायंनुजैमिनिःप्रश्नव्याख्यानाभ्यामपिचैवमेके॥१८॥वाक्यान्वयात्॥१९॥प्रति

॥शा॰सू॰
॥३॥

ज्ञासिद्धेर्लिंगमाश्मरथाः॥२०॥उत्क्रमिष्यत एवंभावादित्यौडुलोमिः॥२१॥अवस्थितेरितिकाशकृ
त्स्नः॥२२॥प्रकृतिश्च प्रतिज्ञादृष्टांतानुपरोधात्॥२३॥अभिध्योपदेशाच्च॥२४॥साक्षाच्चोभयाम्ना
नात्॥२५॥आत्मकृतेः परिणामात्॥२६॥योनिश्च हि गीयते॥२७॥एतेन सर्वे व्याख्याः व्याख्याताः
॥२८॥इति प्रथमाध्यायस्य चतुर्थः पादः॥ ॥प्रथमाध्यायस्य सूत्राणि १३४॥ ॥स्मृत्यनव
काशदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात्॥१॥इतरेषां चानुलब्धेः॥२॥एतेन यो
गः प्रत्युक्तः॥३॥न विलक्षणत्वादस्य तथात्वं च शब्दात्॥४॥अभिमानिव्यपदेशस्तु विशेषानु
गतिभ्यां॥५॥दृश्यते तु॥६॥असदिति चेन्न प्रतिषेधमात्रत्वात्॥७॥अपीतौ तद्वत्प्रसंगादस
मंजसं॥८॥न तु दृष्टांताभावात्॥९॥स्वपक्षदोषाच्च॥१०॥तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति
चेदेवमप्यविमोक्षप्रसंगः॥११॥एतेन शिष्टापरिग्रहा अपि व्याख्याताः॥१२॥भोक्त्रापत्तेरविभा
गश्चेत्स्याल्लोकवत्॥१३॥तदन्यत्वमारंभणशब्दादिभ्यः॥१४॥भावे चोपलब्धेः॥१५॥सत्वाच्चाव
रस्य॥१६॥असद्व्यपदेशान्नेति चेन्न धर्मांतरेण वाक्यशेषात्॥१७॥युक्तेः शब्दांतराच्च॥१८॥ ॥३॥

पटवच्च॥१९॥यथा च प्राणादि॥२०॥इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः॥२१॥अधि
कं तु भेदनिर्देशात्॥२२॥अस्मादिवच्च तदनुपपत्तिः॥२३॥उपसंहारदर्शनान्नेति चेत्क्षीरवद्धि
॥२४॥देवादिवदपि लोके॥२५॥कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा॥२६॥श्रुतेस्तु शब्दमूल
त्वात्॥२७॥आत्मनि चैवं विचित्राश्च हि॥२८॥स्वपक्षदोषाच्च॥२९॥सर्वोपेता च तद्दर्शनात्॥३०॥वि
करणत्वान्नेति चेत्तदुक्तम्॥३१॥न प्रयोजनवत्वात्॥३२॥लोकवत्तु लीलाकैवल्यं॥३३॥वैषम्यनै
र्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति॥३४॥न कर्माविभागादिति चेन्नानादित्वात्॥३५॥उपपद्यते
चाप्युपलभ्यते च॥३६॥सर्वधर्मोपपत्तेश्च॥३७॥इति द्वितीयाध्यायस्य प्रथमः पादः॥ ॥
रचनानुपपत्तेश्च नानुमानं॥१॥प्रवृत्तेश्च॥२॥पयोंबुवच्चेत्तत्रापि॥३॥व्यतिरेकानवस्थितेश्चान
पेक्षत्वात्॥४॥अन्यत्राभावाच्च न तृणादिवत्॥५॥अभ्युपगमेप्यर्थाभावात्॥६॥पुरुषाश्मवदि
ति चेत्तथापि॥७॥अंगित्वानुपपत्तेश्च॥८॥अन्यथानुमितौ च ज्ञशक्तिवियोगात्॥९॥विप्रतिषेधा
च्चासमंजसं॥१०॥महद्दीर्घवद्वाह्रस्वपरिमंडलाभ्यां॥११॥उभयथा न कर्मातस्तदभावः॥१२॥
समवायाभ्युपगमाच्च साम्यादनवस्थितेः॥१३॥नित्यमेव च भावात्॥१४॥रूपादिमत्वाच्च विपर्य

योदृश्यनात्॥२५॥उभयथाचदोषात्॥२६॥अपरिग्रहाच्चात्यंतमनपेक्षा॥२७॥समुदायउभयहेतुकेपितदप्राप्तिः॥२८॥इतरेतरप्रत्ययत्वादितिचेन्नोत्पत्तिमात्रनिमित्तत्वात्॥२९॥उभयथादेचदूर्वनिरोधात्॥३०॥असतिप्रतिज्ञोपरोधोयौगपद्यमन्यथा॥३१॥प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात्॥३२॥उभयथाचदोषात्॥३३॥आकाशेवाविशेषात्॥३४॥अनुस्मृतेश्च॥३५॥नासतोदृष्टत्वात्॥३६॥उदासीनानामपिचैवंसिद्धिः॥३७॥नाभावउपलब्धेः॥३८॥वैधर्म्यच्चस्वप्नादिवत्॥३९॥नभावोनुपलब्धेः॥४०॥क्षणिकत्वाच्च॥४१॥सर्वथानुपपत्तेश्च॥४२॥नैकस्मिन्नसंभवात्॥४३॥एवंचात्माकार्त्स्न्यं॥४४॥नचपर्यायादविरोधोविकारादिभ्यः॥४५॥अंत्यावस्थितेश्चोभयनित्यत्वादविशेषः॥४६॥पत्युरसामंजस्यात्॥४७॥संबंधानुपपत्तेश्च॥४८॥करणवच्चेन्नभोगादिभ्यः॥४९॥अंतवत्त्वमसर्वज्ञतावा॥५०॥उत्पत्त्यसंभवात्॥५१॥नचकर्तुःकरणं॥५२॥विज्ञानादिभावेवातदप्रतिषेधः॥५३॥विप्रतिषेधाच्च॥५४॥इतिद्वितीयाध्यायस्यद्वितीयःपादः॥

॥नवियदश्रुतेः॥१॥अस्तितु॥२॥गोण्यसंभवात्॥३॥शब्दाच्च॥४॥स्याच्चैकस्यब्रह्मशब्दवत्॥५॥प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः॥६॥यावद्विकारंतुविभागोलोकवत्॥७॥एतेनमातरिश्वा ॥४॥

आख्यातः॥८॥असंभवस्तुसतोनुपपत्तेः॥९॥तेजोतस्तथाह्याह॥१०॥आपः॥११॥पृथिव्यधिकाररूपशब्दांतरेभ्यः॥१२॥तदभिध्यानादेवतुतल्लिंगात्सः॥१३॥विपर्ययेणतुक्रमोतउपपद्यते॥१४॥अंतराविज्ञानमनसक्रमेणतल्लिंगादितिचेन्नाविशेषात्॥१५॥चराचरव्यपाश्रयस्तुस्यात्तद्व्यपदेशोभाक्तस्तद्भावभावित्वात्॥१६॥नात्माश्रुतेर्नित्यत्वाच्चताभ्यः॥१७॥ज्ञएव॥१८॥उत्क्रांतिगत्यागतीनां॥१९॥स्वात्मनाचोत्तरयोः॥२०॥नाणुरतच्छ्रुतेरितिचेन्नेतराधिकारात्॥२१॥स्वशब्दोन्मानाभ्यांचनहि॥२२॥अविरोधश्चंदनवत्॥२३॥अवस्थितिवैशेष्यादितिचेन्नाभ्युपगमाद्धृदिहि॥२४॥गुणाद्वालोकवत्॥२५॥व्यतिरेकोगंधवत्॥२६॥तथाचदर्शयति॥२७॥पृथगुपदेशात्॥२८॥तद्गुणसारत्वात्तुतद्व्यपदेशःप्राज्ञवत्॥२९॥यावदात्मभावित्वाच्चनदोषस्तद्दर्शनात्॥३०॥पुंस्त्वादिवत्त्वस्यसतोभिव्यक्तियोगात्॥३१॥नित्योपलब्ध्यनुपलब्धिप्रसंगोन्यतरनियमोवा॥३२॥कर्तृशास्त्रार्थवत्वात्॥३३॥विहारोपदेशात्॥३४॥उपादानात्॥३५॥व्यपदेशाच्चक्रियायांनचेन्निर्देशविपर्ययः॥३६॥उपलब्धिवदनियमः॥३७॥शक्तिविपर्ययात्॥३८॥समा

॥शा॰सू॰॥ ॥५॥

ध्यभावाच्च॥३९॥यथाचतक्षोभयथा॥४०॥परात्तुतच्छ्रुतेः॥४१॥कृतप्रयत्नापेक्षस्तुविहितप्रति
षिद्धावैयर्थ्यादिभ्यः॥४२॥अंशोनानाव्यपदेशादन्यथाचापिदाशकितवादित्वमधीयतएके॥४३॥
मंत्रवर्णात्॥४४॥अपिस्मर्यते॥४५॥प्रकाशादिवन्नैवंपरः॥स्मरंतिच॥४७॥अनुज्ञापरिहारौ
देहसंबंधाज्ज्योतिरादिवत्॥४८॥असंततेश्चाव्यतिकरः॥४९॥आभासएवच॥५०॥अदृष्टानि
यमात्॥५१॥अभिसंध्यादिष्वपिचैवम्॥५३॥प्रवेशादितिचेन्नांतर्भावात्॥५३॥इतिद्विती
याध्यायस्यतृतीयःपादः॥ ॥तथाप्राणाः॥१॥गौण्यसंभवात्॥२॥तत्प्राक्श्रुतेश्च॥३॥त
त्पूर्वकत्वाद्वाचः॥४॥सप्तगतेर्विशेषितत्वाच्च॥५॥हस्तादयस्तुस्थितोनैवमे॥६॥अणवश्च ते
॥७॥श्रेष्ठश्च॥८॥नवायुक्तियेपृथगुपदेशात्॥९॥चक्षुरादिवत्तुतत्सहशिष्यादिष्यादि
न्यः॥१०॥अकरणत्वाच्चनदोषस्तथाहिदर्शयति॥११॥पंचवृत्तिर्मनोवव्यपदिष्यते॥१२॥
अणुश्च॥१३॥ज्योतिराद्यधिष्ठानंतुतदामननात्॥१४॥प्राणवताशब्दात्॥१५॥तस्यचनि
त्यत्वात्॥१६॥तदिंद्रियाणितद्व्यपदेशादन्यत्रचेष्टात्॥१७॥भेदश्रुतेः॥१८॥वैलक्षण्या ॥५॥

च्च॥१९॥संज्ञामूर्त्तिक्लृप्तिस्त्रिवृत्कुर्वतउपदेशात्॥२०॥मांसादिभौमंयथाशब्दमितरयोश्च॥२१॥वैशे
ष्यात्तुतद्वादस्तद्वादः॥२२॥इतिद्वितीयाध्यायस्यचतुर्थःपादः॥द्वितीयाध्यायस्यसूत्राणि१५६॥ ॥
तदंतरप्रतिपत्तौरंहतिसंपरिष्वक्तःप्रश्ननिरूपणाभ्याम्॥१॥आत्मकत्वात्तुभूयस्त्वात्॥२॥प्राण
गतेश्च॥३॥अग्न्यादिगतिश्रुतेरितिचेन्नभाक्तत्वात्॥४॥प्रथमेश्रवणादितिचेन्नताएयह्युपप
त्तेः॥५॥अश्रुतत्वादितिचेन्नेष्टादिकाणांप्रतीतेः॥६॥भाक्तंवानात्मवित्त्वात्तथाहिप्रदर्शयति॥७॥
कृतात्ययेनुशयवान्दृष्टस्मृतिभ्यांयथेतमनेवंच॥८॥चरणादितिचेन्नोपलक्षणार्थेतिकार्ष्णाजि
निः॥९॥आनर्थक्यमितिचेन्नतदपेक्षत्वात्॥१०॥सुकृतदुष्कृतेएवेतितुबादरिः॥११॥अनिष्टा
दिकारिणामपिचश्रुतं॥१२॥संयमनेत्वनुभूयेतरेषांरोहावरोहौतद्गतिदर्शनात्॥१३॥स्म
रंतिच॥१४॥अपिसप्त॥१५॥तत्रापिचतद्व्यापारादविरोधः॥१६॥विद्याकर्मणोरितितुप्रकृत
त्वात्॥१७॥नतृतीयेतथोपलब्धेः॥१८॥स्मर्यतेपिचलोके॥१९॥दर्शनाच्च॥२०॥तृतीयशब्दा
वरोधःसंशोकजस्य॥२१॥साभाव्यापत्तिरुपपत्तेः॥२२॥नातिचिरेणविशेषात्॥२३॥अन्याधि
ष्ठितेपूर्ववदभिलापात्॥२४॥अशुद्धमितिचेन्नशब्दात्॥२५॥रेतःसिग्योगोथ॥२६॥योनेःशरीरं॥२७॥

॥इतितृतीयाध्यायस्यप्रथमःपादः॥ ॥संध्येसृष्टिराहहि॥१॥निर्मातारंचैकेपुत्रादयश्च॥२॥
मायामात्रंतुकार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्॥३॥सूतकश्चहिश्रुतेराचक्षतेचतद्विदः॥४॥पराभिध्या
नात्तुतिरोहितंततोह्यस्यबंधविपर्ययौ॥५॥देहयोगाद्वासोपि॥६॥तदभावोनाडिषुतच्छ्रुतेरात्म
निच॥७॥अतःप्रबोधोस्मात्॥८॥सएवतुकर्मानुस्मृतिशब्दविदिभ्यः॥९॥मुग्धेर्द्धसंपत्तिःपरि
शेषात्॥१०॥नस्थानतोपिपरस्योभयलिंगंसर्वत्रहि॥११॥नत्रेदादिचेन्नप्रत्येकमतद्वचनात्॥१२॥
अपिचैवमेके॥१३॥अरूपवदेवहितत्प्राधान्यात्॥१४॥प्रकाशवच्चावैयर्थ्यात्॥१५॥आहचतन्मा
त्रं॥१६॥दर्शयतिचाथोपिस्मर्यते॥१७॥अतएवचोपमासूर्यकादिवत्॥१८॥अंबुवदग्रहणात्तुनतथा
त्वं॥१९॥वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवं॥२०॥दर्शनाच्च॥२१॥प्रकृतैतावत्त्वंहिप्रतिषेध
तिततोब्रवीतिचभूयः॥२२॥तदव्यक्तमाहहि॥२३॥अपिसंराधनेप्रत्यक्षानुमानाभ्यां॥२४॥प्रकाशादि
वच्चावैशेष्यंप्रकाशश्चकर्मण्यभ्यासात्॥२५॥अतोनतेनतथाहिलिंगं॥२६॥उभयव्यपदेशात्त्वहिकुं
डलवत्॥२७॥प्रकाशाश्रयवद्वातेजस्त्वात्॥२८॥पूर्ववद्वा॥२९॥प्रतिषेधाच्च॥३०॥परमतःसेतून्मा
नसंबंधभेदव्यपदेशेभ्यः॥३१॥सामान्यात्तु॥३२॥बुध्यर्थःपादवत्॥३३॥स्थानविशेषात्प्रकाशादि

वत्॥३४॥उपपत्तेश्च॥३५॥तथान्यप्रतिषेधात्॥३६॥अनेनसर्वगतत्वमायामशब्दादिभ्यः॥३७॥फ
लमतमुपपत्तेः॥३८॥श्रुतत्वाच्च॥३९॥धर्मंजैमिनिरतएव॥४०॥पूर्वंतुबादरायणोहेतुव्यपदेशात्
॥४१॥इतितृतीयाध्यायस्यद्वितीयःपादः॥ ॥सर्ववेदांतप्रत्ययंचोदनाद्यविशेषात्॥१॥भेदान्नेति
चेदेकस्यामपि॥२॥स्वाध्यायस्यतथात्वेनसमाचारेऽधिकाराच्चसर्ववच्चतन्नियमः॥३॥दर्शयति
च॥४॥उपसंहारोर्थाभेदाद्विधिशेषवत्समानेच॥५॥अन्यथात्वंशब्दादितिचेन्नाविशेषात्॥६॥
नप्रवोकरणभेदातरोवरीयस्त्वादिवत्॥७॥संज्ञातश्चेत्तदुक्तमस्तितुतदपि॥८॥व्याप्तेश्चस
मंजसम्॥९॥सर्वाभेदादन्यत्रेमे॥१०॥आनंदादयःप्रधानस्य॥११॥प्रियशिरस्त्वाद्यप्राप्तिरु
पचयापचयौहिभेदे॥१२॥इतरेत्वर्थसामान्यात्॥१३॥आध्यानायप्रयोजनाभावात्॥१४॥आ
त्मशब्दाच्च॥१५॥आत्मगृहीतिरितरवदुत्तरात्॥१६॥अन्वयादितिचेत्स्यादवधारणात्॥१७॥
कार्याख्यानादपूर्वं॥१८॥समानएवंचाभेदात्॥१९॥संबंधादेवमन्यत्रापि॥२०॥नवाविशेषा
त्॥२१॥दर्शयतिच॥२२॥संभृतिद्युव्याप्त्यपिचातः॥२३॥पुरुषविद्यायामिवचेतरेषामनाम्ना
नात्॥२४॥वेधाद्यर्थभेदात्॥२५॥हानौतूपायनशब्दशेषत्वात्कुशाछंदःस्तुत्युपगानवत्तदुक्तं॥२६॥

सांपरायेनतत्प्रधानत्वेनतथान्येभावात्तृतथान्येभावात्तृ॥२७॥छंदतउभयाविरोधात्तृ॥२८॥गतेरर्थवत्त्वमुभयथान्यथा
हिविरोधः॥२९॥उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्तृ॥३०॥सनियमःसतिसामविरोधश्चा
नुमानानां॥३१॥यावदधिकारमवस्थितिराधिकारिकाणां॥३२॥अक्षरधियांत्ववरोधःसामान्यतद्भावा
भ्यामौपसदवत्तदुक्तं॥३३॥इयदामननात्तृ॥३४॥अंतराभूतग्रामवत्स्वात्मनः॥३५॥अन्यथाऽने
दानुपपत्तिरितिचेन्नोपदेशांतरवत्तृ॥३६॥व्यतिहारोविशिंषंतिहीतरवत्तृ॥३७॥सैवहिसत्या
दयः॥३८॥कामादितरत्रतत्रचायतनादिभ्यः॥३९॥आदरादलोपः॥४०॥उपस्थितेऽतस्तद्व
चनात्तृ॥४१॥तन्निर्धारणानियमस्तद्दृष्टेःपृथग्ह्यप्रतिबंधःफलं॥४२॥अदानवदेवतदुक्तं॥४३॥
लिंगभूयस्त्वात्तद्धिबलीयस्तदपि॥४४॥पूर्वविकल्पःप्रकरणात्क्रियामानसवत्तृ॥४५॥अ
निदेशाच्च॥४६॥विद्यैवतुनिर्धारणात्तृ॥४७॥दर्शनाच्च॥४८॥श्रुत्यादिबलीयस्त्वाच्चनबाधः॥४९॥
अनुबंधादिभ्यःप्रज्ञांतरपृथक्त्ववदृष्टंतदुक्तं॥५०॥नसामान्यादुपलब्धेर्मृत्युवन्नहिलो
कापत्तिः॥५१॥परेणचशब्दस्यतादिध्यंभूयस्त्वात्त्वनुबंधः॥५२॥एकआत्मनःशरीरेभावात्तृ॥५३॥
व्यतिरेकस्तद्भावाभावित्वान्नत्वपलब्धिवत्तृ॥५४॥अंगावबद्धास्तुनशाखासुहिप्रतिवेदं॥५५॥ ॥७॥

मेत्रादिवद्वाऽविरोधः॥५६॥स्मृत्यनवकाशदोषप्रसंगइतिचेन्नान्यस्मृत्यनवकाशदोषप्रसंगात्तृ॥५७॥
विकल्पोऽविशिष्टफलत्वात्तृ॥५८॥कामाश्चयथाकामंसमुच्चीयेरन्नवाऽपूर्वहेत्वभावात्तृ॥५९॥अं
गेषुयथाश्रयभावः॥६०॥शिष्टेश्च॥६१॥समाहारात्तृ॥६२॥गुणसाधारण्यश्रुतेश्च॥६३॥नवा
तत्सद्भावाश्रुतेः॥६४॥दर्शनाच्च॥६५॥इतिनतीयाध्यायस्यनतीयःपादः॥ ॥पुरुषार्थेतिःश
ब्दादितिबादरायणः॥१॥शेषत्वात्पुरुषार्थवादोयथान्येषितिजैमिनिः॥२॥आचारदर्शनात्तृ॥३॥
तच्छ्रुतेः॥४॥समन्वारंभणात्तृ॥५॥तद्वतोविधानात्तृ॥६॥नियमाच्च॥७॥अधिकोपदेशात्तृबाद
रायणस्यैवंतद्दर्शनात्तृ॥८॥तुल्यंतुदर्शनं॥९॥असार्वत्रिकी॥१०॥विभागःशतवत्तृ॥११॥अ
ध्ययनमात्रवतः॥१२॥नाविशेषात्तृ॥१३॥स्तुतयेऽनुमतिर्वा॥१४॥कामकारेणचैके॥१५॥उप
मर्दंच॥१६॥ऊर्ध्वरेतःसुचशब्देहि॥१७॥परामर्शंजैमिनिरचोदनांचापवदतिहि॥१८॥अ
नुष्ठेयंबादरायणःसाम्यश्रुतेः॥१९॥विधिर्वाधारणवत्तृ॥२०॥स्तुतिमात्रमुपादानादिति
चेन्नापूर्वत्वात्तृ॥२१॥भावशब्दाच्च॥२२॥पारिप्लवार्थाइतिचेन्नविशेषितत्वात्तृ॥२३॥तथा

चैकवाक्योपबंधात्॥२४॥अत एव चाग्नींधनाद्यनपेक्षा॥२५॥सर्वापेक्षा च यज्ञादिश्रुतेरश्व
वत्॥२६॥शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदंगत्वात्तेषामवश्यानुष्ठेयत्वात्॥२७॥सर्वा
न्नानुमतिश्च प्राणात्यये तद्दर्शनात्॥२८॥अबाधाच्च॥२९॥अपि स्मर्यते॥३०॥शब्दश्चातो का
मकारे॥३१॥विहितत्वाच्चाश्रमकर्मापि॥३२॥सहकारित्वेन च॥३३॥सर्वथापि त एवोभय
लिंगात्॥३४॥अनभिभवं च दर्शयति॥३५॥अंतरा चापि तु तद्दृष्टेः॥३६॥अपि स्मर्यते॥३७॥वि
शेषानुग्रहश्च॥३८॥अतस्त्वितरज्यायो लिंगाच्च॥३९॥तद्भूतस्य तु नातद्भावो जैमिनेरपि निय
मातद्रूपाभावेभ्यः॥४०॥न चाधिकारिकमपि पतनानुमानात्तदयोगात्॥४१॥उपपूर्वमपीत्ये
के भावमशनवत्तदुक्तं॥४२॥बहिस्तूभयथापि स्मृतेः सचाराच्च॥४३॥स्वामिनः फलश्रुतेरित्या
त्रेयः॥४४॥आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते॥४५॥श्रुतेश्च॥४६॥सहकार्यंतरवि
धिः पक्षेण तृतीयं तद्वतो विध्यादिवत्॥४७॥कृत्स्नभावात्तु गृहिणोपसंहारः॥४८॥मौनवदित
रेषाप्युपदेशात्॥४९॥अनाविष्कुर्वन्नन्वयात्॥५०॥ऐहिकमप्रस्तुतप्रतिबंधे तद्दर्शनात्॥५१॥

एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः॥५२॥इति तृतीयाध्यायस्य चतुर्थः पादः॥
तृतीयाध्यायस्य सूत्राणि॥१८६॥ ॥आवृत्तिरसकृदुपदेशात्॥१॥लिंगाच्च॥२॥आत्मेति तूपग
च्छंति ग्राहयंति च॥३॥न प्रतीके न हि सः॥४॥ब्रह्मदृष्टिरुत्कर्षात्॥५॥आदित्यादिमतयश्चांग
उपपत्तेः॥६॥आसीनः संभावात्॥७॥ध्यानाच्च॥८॥अचलत्वं चापेक्ष्य॥९॥स्मरंति च॥१०॥यत्रै
काग्रता तत्र विशेषात्॥११॥आप्रयाणात्तत्रापि हि दृष्टं॥१२॥तदधिगम उत्तरपूर्वाघयोरश्ले
षविनाशौ तद्व्यपदेशात्॥१३॥इतरस्याप्येवमसंश्लेषः पातेषु॥१४॥अनारब्धकार्ये एव तु पू
र्वे तदवधेः॥१५॥अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्॥१६॥अतोन्याह्येकेषामुभयोः॥१७॥
यदेव विद्ययेति हि॥१८॥भोगेन त्वितरे क्षपयित्वाथ संपद्यते॥१९॥इति चतुर्थाध्यायस्य प्रथमः
पादः॥ ॥वाङ्मनसि दर्शनाच्छब्दाच्च॥१॥अत एव सर्वाण्यनु॥२॥तन्मनः प्राण उत्तरात्
॥३॥सोध्यक्षे तदुपगमादिभ्यः॥४॥भूतेषु तच्छ्रुतेः॥५॥नैकस्मिन्दर्शयतो हि॥६॥समाना
चासृत्युपक्रमादमृतत्वं चानुपोष्य॥७॥तदापीतेः संसारव्यपदेशात्॥८॥सूक्ष्मं प्रमाणत

श्चतथोपलब्धेः॥९॥नोपमर्देनातः॥१०॥अस्येवचोपपत्तेरूष्मा॥११॥प्रतिषेधादितिचेन्न
शारीरात्॥१२॥स्पष्टोह्येकेषां॥१३॥स्मर्यतेच॥१४॥तानिपरेतथाह्याह॥१५॥अविभागोवचना
त्॥१६॥तदोकोग्रज्वलनंतत्प्रकाशितद्वारोविद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्चहार्द्दा
नुगृहीतःशताधिकया॥१७॥रश्म्यनुसारी॥१८॥निशिनेतिचेन्नसंबंधस्ययावद्देहभावित्वा
द्दर्शयतिच॥१९॥अतश्चायनेपिदक्षिणे॥२०॥योगिनःप्रतिस्मर्यतेस्मार्त्तेचैते॥२१॥इति
चतुर्थाध्यायस्यद्वितीयःपादः॥ ॥अर्चिरादिनातत्प्रथितेः॥१॥वायुमब्दादविशेषवि
शेषाभ्यां॥२॥तडितोधिवरुणःसंबंधात्॥३॥वरुणाच्चाधींद्रप्रजापती॥४॥आतिवाहि
कास्तल्लिंगात्॥५॥उभयव्यामोहात्तत्सिद्धेः॥६॥वैद्युतेनैवततस्तच्छ्रुते॥७॥कार्यंबादरि
रस्यगत्युपपत्तेः॥८॥विशेषितत्वाच्च॥९॥सामीप्यात्तुतद्व्यपदेशः॥१०॥कार्यात्ययेत
दध्यक्षेणसहातःपरमभिधानात्॥११॥स्मृतेश्च॥१२॥परंजैमिनिर्मुख्यत्वात्॥१३॥द
र्शनाच्च॥१४॥नचकार्येप्रतिपत्त्यभिसंधिः॥१५॥अप्रतीकालंबनान्नयतीतिबादरा

यणउभयथादोषात्तत्क्रतुश्च॥१६॥विशेषंचदर्शयति॥१७॥इतिचतुर्थाध्यायस्यतृतीयः
पादः॥ ॥संपद्याविर्भावःस्वेनशब्दात्॥१॥मुक्तःप्रतिज्ञानात्॥२॥आत्माप्रकरणात्॥३॥अ
विभागेनदृष्टत्वात्॥४॥ब्राह्मेणजैमिनिरुपन्यासादिभ्यः॥५॥चितितन्मात्रेणतदात्मकत्वा
दित्यौडुलोमिः॥६॥एवमप्युपन्यासात्पूर्वभावादविरोधंबादरायणः॥७॥संकल्पादेवत
च्छ्रुतेः॥८॥अतएवचानन्याधिपतिः॥९॥अभावंबादरिराहह्येवं॥१०॥भावंजैमिनि
र्विकल्पामननात्॥११॥द्वादशाहवदुभयविधंबादरायणोतः॥१२॥तत्वभावेसंध्यव
दुपपत्तेः॥१३॥भावेजाग्रद्वात्॥१४॥प्रदीपवदावेशस्तथाहिदर्शयति॥१५॥स्वाप्ययसं
पत्त्योरन्यतरापेक्षमाविष्कृतंहि॥१६॥जगद्व्यापारवर्जंप्रकरणादसंनिहितत्वाच्च॥१७॥
प्रत्यक्षोपदेशादितिचेन्नाधिकारिकमंडलस्थोक्तेः॥१८॥विकारावर्त्तिचतथाहिस्थितिमाह
॥१९॥दर्शयतश्चैवंप्रत्यक्षानुमाने॥२०॥भोगमात्रसाम्यलिंगाच्च॥२१॥अनावृत्तिःशब्दा
दनावृत्तिःशब्दात्॥२२॥इतिचतुर्थाध्यायस्यचतुर्थःपादः॥ ॥चतुर्थाध्यायस्यसूत्राणि७९

॥शा॰सू॰ शारीरकसूत्रसंख्या ५५५॥ संवत् १८६० शके १७२५ फाल्गुनसुदि १५ शनौ तापीतटे अश्व
॥१०॥ नीकुमारेश्वरक्षेत्रे माधवानंदसरस्वत्या लिखितोयं शारीरकसूत्राख्यो ग्रंथः॥

अत्र कृत्स्नशास्त्रप्रतिपाद्यं ब्रह्म अध्यायैस्तु प्रतिपाद्यानि समन्वयाऽविरोधसाधनफलानि॥ तदुक्तं॥ शास्त्रं
ब्रह्मविचाराख्यमध्यायाः स्युश्चतुर्विधाः॥ समन्वयाऽविरोधौ द्वौ साधनं च फलं तथेति॥१॥
लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च॥ सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः॥२॥
अनेकार्थाः सूच्यते अनेनेति सूत्रं॥ इति आनंदगिरिटीकायां॥ ॥सूत्रार्थो वर्ण्यते वाक्यैः सूत्रानु यत्र
कारिभिः॥ स्वपदानि च वर्ण्यंते भाष्यं भाष्यविदो विदुः॥ विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरः॥
प्रयोजनं च पंचैते प्राञ्चोधिकरणं विदुः॥१॥

॥१०॥